ऽग्निप्रशान्तं कृत्वोल्लेखनादि कृत्वाऽग्रशेषेण ब्रह्मणे विष्णवे शिवाय यमाय सपरिवाराय चतुरः पिण्डान् दत्त्वा प्रेतनामगोत्रे स्मृत्वा विष्णुनाम्ना पञ्चमं दत्त्वाभ्यर्च्याचान्तेभ्यो दक्षिणां दत्त्वैकं प्रेतं स्मृत्वा विशेषतः संतोष्य विप्रैः प्रेतायेदं तिलोदकमुपतिष्ठतामिति सतिलमुदकं दापयित्वा भुञ्जीतेति। अत्र विशेषान्तरं भट्टकृतान्त्येष्टिपद्धतौ ज्ञेयम् ॥ * ॥ सर्पहते तु वर्षपर्य्यन्तं पूर्व्वं ह्येकभक्तपूर्व्वं शुक्लपञ्चम्यामुपवासं नक्तं वा कृत्वा पिष्टमयं नागमनन्तवासुकिशङ्खपद्मकम्बलकर्क्कोटकाश्वतरधृतराष्ट्रशङ्खपालकालियतक्षककपिलेति नामभिः प्रतिमासं संपूज्य पायसेन विप्रान् संभोज्य वत्सरान्ते हैमं नागं गाञ्च प्रत्यक्षाय दत्त्वा नारायणबलिं कुर्य्यात्। मूलन्तु हेमाद्रौ ज्ञेयम् ॥ * ॥ बौधायनसूत्रे सर्पहतानां नमोऽस्तु सर्पेभ्य इति तिस्र आहुतीर्हुत्वोदके मृतानां समुद्राय वरुणाय हुत्वेति क्रियां कुर्य्यादिति शेषः। व्यासः।

सौवर्णभारनिष्पन्नं नागं कृत्वा तथैव गाम्।
व्यासाय दत्त्वा विधिवत् पितुरानृण्यमाप्नुयात्॥'
हेमाद्रौ भविष्ये।
'प्रकुर्य्यात् पन्नगं हैमं स्वर्णेनैकेन कारयेत्।
क्षीराज्यपात्रमध्यस्थं पूज्यविप्राय दापयेत्॥
प्रायश्चित्तमिदं प्रोक्तं नागदष्टस्य शम्भुनेति॥'
अपरार्केऽप्यन्तरे।
तदैव शुध्यति प्रेतो नारायणबलौ कृते।
यो ददाति क्रियापिण्डं तस्मै प्रेताय वै सुतः।
तस्यैवाशौचमुद्दिष्टं त्र्यहमेव न संशयः॥
विष्णुश्राद्धसमाप्तौ तु त्रयोदश्यां दिनत्रयम्।
अशौचं पिण्डदः कुर्य्यान्न तु तद्बन्धुगोत्रजाः॥
यस्य वै मृत्युकाले तु व्युच्छिन्ना सन्ततिर्भवेत्।
स वसेन्नरके नित्यं पङ्कमग्नः करी यथा॥'
इत्युपक्रम्य,—
'बलिं नारायणं कुर्य्यात्तस्योद्देशेन भक्तिमान्॥'
इति गारुडोक्तेरपुत्रस्यापि पत्न्याद्यैः कार्य्य इत्युक्तं देवयाज्ञिकेन।" इति निर्णयसिन्धौ ५ परिच्छेदः॥

नारायणास्त्रं, क्ली, (नारायणस्यास्त्रम्।) विष्णोरस्त्रभेदः। तत्स्वरूपं यथा, देवीपुराणे।

"तदा दानवनाथेन युक्तं नारायणं शरम्।
शङ्खचक्रगदाहस्तं खड्गपृष्ठध्वजस्थितम्॥"
अपि च।
"ततो हरिहरं युद्धमभवद्रोमहर्षणम्।
रुद्रः पाशुपतास्त्रेण विव्याध हरिमोजसा॥
हरिर्नारायणास्त्रेण रुद्रं विव्याध कोपवान्।
नारायणं पाशुपतमुभेऽस्त्रे व्योम्नि रोधिते॥
युयुधाते भृशं दिव्यं परस्परनिघांसया।
दिव्यं वर्षसहस्रन्तु तयोर्युद्धमभूत्तदा॥
तत्रैकं धूर्जटीदृष्टं महान्तं जटजालकम्।
शङ्खं प्रध्मापयच्चक्रमन्यं डमरुकं शुभम्॥
एकं खड्गधरं तत्र तथान्यं दण्डधारिणम्।
एकं कौस्तुभशोभाङ्गमन्यं भूतिविभूतिकम्॥
एकं गदां भ्रामयन्तं द्वितीयं दण्डमेव च।
एकः शोभति कण्ठस्थैर्मणिभिस्त्वस्थिभिः परः।
एकं पीताम्बरं तत्र द्वितीयं सर्पमेखलम्॥
एवन्तौ सञ्चिनावस्त्रौ रुद्रनारायणात्मकौ।
अन्योन्यातिशयोपेतौ तदा लोकपितामहः॥
उवाच शाम्यतामस्त्रे स्वस्वभावेन सुव्रते।
एवन्ते ब्रह्मणा चोक्ते शान्तभावं प्रजग्मतुः॥
तथा विष्णुहरौ ब्रह्मा वाक्यमेतदुवाच ह।
उभौ हरिहरौ देवौ लोके ख्यातिं गमिष्यतः॥"
इति वराहपुराणम्॥

नारायणी, स्त्री, (नारायणस्येयमिति। नारायण + अण् + ङीप्।) दुर्गा। (यथा, मार्कण्डेये। ९१। ९।

"सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि! नमोऽस्तु ते॥"
इयं सुपार्श्वाख्यपीटस्थाने एतन्मूर्त्त्या विराजते। यथा, देवीभागवते। ७। ३१। ६६।
"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥")
लक्ष्मीः। शतावरी। इति हेमचन्द्रः॥ * ॥ तस्या निरुक्तिर्यथा,—
"यशसा तेजसा रूपैर्नारायणसमा गुणैः।
शक्तिर्नारायणस्येयं तेन नारायणी स्मृता॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४५ अध्यायः॥
अपि च।
"नारायणार्द्धाङ्गभूता तेन तुल्या च तेजसा।
तदा तस्य शरीरस्था तेन नारायणी स्मृता॥"
इति तत्रैव श्रीकृष्णजन्मखण्डे २७ अध्यायः॥ * ॥
गङ्गा। यथा, तन्त्रे।
"गङ्गायै विश्वमुख्यायै शिवामृतायै नारायण्यै नमः॥"
(यथा च काशीखण्डे। २९। ९७।
"नभोऽङ्गनचरी नूतिर्नम्या नारायणी नुता॥")
मुद्गलमुनिपत्नी। इति पुराणम्॥ (स्वनामख्याता श्रीकृष्णसम्बन्धिनी सेना। इयं हि भारतयुद्धे दुर्य्योधनपक्षमाश्रितवती॥)

नारिकेरः, पुं, (नारिकेलः + लस्य रः।) नारिकेलः। इति शब्दरत्नावली॥

नारिकेलः, पुं, (किल श्वैत्ये क्रीड़ने च + भावे घञ्। नार्य्याः रमण्याः केल इव सुखदायी केलो यस्य। पृषोदरादित्वात् ह्रस्वः।) स्वनामप्रसिद्धफलवृक्षविशेषः। तत्पर्य्यायः। लाङ्गली २। इत्यमरः। २। ४। १६८॥ नारिकेरः ३ नाड़िकेलः ४ नारीकेलः ५ नारीकेली ६ नारिकेरी ७। इत्यादि भरतः। नारिकेलिः ८ सदापुष्पः ९ शिरःफलः १०। इति शब्दमाला॥ नालिकेरः ११ रसफलः १२ सुतुङ्गः १३ कूर्च्चशेखरः १४ दृढ़नीलः १५ नीलतरुः १६ मङ्गल्यः १७ उच्चतरुः १८ तृणराजः १९ स्कन्धतरुः २० दाक्षिणात्यः २१ दुरारुहः २२ त्र्यम्बकफलः २३ दृढ़फलः २४। इति राजनिर्घण्टः॥ कूर्च्चशीर्षकः २५ तुङ्गः २६ स्कन्धफलः २७ उच्चः २८ सदाफलः २९। इति भावप्रकाशः॥ शिराफलः ३० करकाम्भाः ३१ पयोधरः ३२ मृत्कुणः ३३ कौषिकफलः ३४ फलकुण्डः ३५ घटाफलः ३६ मुण्डफलः ३७ विश्वामित्रप्रियः ३८। इति शब्दरत्नावली॥ नारकेरः ३९ सुभङ्गः ४० फलकेसरः ४१। इति जटाधरः॥ अस्य गुणाः। गुरुत्वम्। स्निग्धत्वम्। शीतत्वम्। पित्तनाशित्वञ्च॥ * ॥ अर्द्धपक्वस्य तस्य गुणाः। तृषाशोषशमनत्वम्। दुर्ज्जरत्वञ्च॥ * ॥ बालनारिकेलजलगुणाः। लघुत्वम्। शीतलत्वम्। रसपाके मधुरत्वम्। पित्तपीनसतृषास्रविदाहभ्रान्तिशोषशमनत्वम्। सुखदायित्वञ्च॥ * ॥ पक्वनारिकेलजलगुणाः। किञ्चित्पित्तकारित्वम्। रुचिदत्वम्। मधुरत्वम्। दीपनत्वम्। बलकरत्वम्। गुरुत्वम्। वृष्यत्वम्। वीर्य्यवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ * ॥

"नारिकेलफलं शीतं दुर्ज्जरं वस्तिशोधनम्।
विष्टम्भि बृंहणं बल्यं वातपित्तास्रदाहहृत्॥
विशेषतः कोमलनारिकेलं
निहन्ति पित्तज्वरमूत्रदोषान्।
तदेव जीर्णं गुरु पित्तकारि
विदाहि विष्टम्भि मतं भिषग्भिः॥
तस्याम्भः शीतलं हृद्यं दीपनं शुक्रलं लघु।
पिपासापित्तजित् स्वादु वस्तिशुद्धिकरं परम्॥"
तस्य मस्तिष्कगुणाः।
"नारिकेलस्य तालस्य खर्ज्जूरस्य शिरांसि तु।
कषायस्निग्धमधुरबृंहणानि गुरूणि च॥"
इति भावप्रकाशः॥ * ॥
"बालस्य नारिकेलस्य जलं प्रायो विरेचनम्॥"
इति राजवल्लभः॥ * ॥
कांस्यपात्रे तज्जलं मद्यतुल्यम्। यथा,—
"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु।
गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना॥"
इति कर्म्मलोचनम्॥

नारिकेलक्षीरी, स्त्री, (नारिकेलोद्भवा क्षीरी।) सितागव्याज्यसंयुक्तगोदुग्धपक्वचूर्णीकृतनारिकेलखण्डम्। यथा,—
"नारिकेलं तनूकृत्य छिन्नं पयसि गोः क्षिपेत्।
सितागव्याज्यसंयुक्तं तत्पचेन्मृदुनाग्निना॥"
तस्या गुणाः।
"नारिकेलोद्भवा क्षीरी स्निग्धा शीतातिपुष्टिदा।
गुर्व्वी सुमधुरा वृष्या रक्तपित्तानिलापहा॥"
इति भावप्रकाशः॥

नारी, स्त्री, (नुर्नरस्य वा धर्म्म्या। नृ + "ऋतोऽञ्।" ४।४।४९। इति अञ्। नर + "नराच्चेति वक्तव्यम्।" इति वार्त्तिकोक्त्या अञ्। "शार्ङ्गरवाद्यञो ङीन्।" ४। १। ७३। इति ङीन्।) नुर्नरस्य वा धर्म्माचारोऽस्याम्। नुर्नरस्य वेयम्। नरधर्म्माचारयुक्ता। तत्पर्य्यायः॥ स्त्री २ योषित् ३ अबला ४ योषा ५ सीमन्तिनी ६ वधूः ७ प्रतीपदर्शिनी ८ वामा ९ वनिता १० महिला ११। इत्यमरः। २। ६। २॥ प्रिया १२ रामा १३ जनिः १४ जनी १५